दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-136 | 1 | मार्च 08, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णपञ्चमी
फाल्गुण 24 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशस्य मन्त्रिमण्डलनिर्णयाः- पंचायतनिर्वाचनेषु पुनः आरक्षिताः न भविष्यन्ति पंचायताः, अंशकालिकाः जलवाहकाः भविष्यन्ति नियमिताः

3 एनसीवीईटी- 'ड्यूल स्टेटस' (द्वैध-स्थिति) प्राप्तकर्ता देशस्य द्वितीयं राज्यमभवत् हिमाचलम्- शिक्षामन्त्री

4 महिलाः केवलं परम्परायाः न, अपितु परिवर्तनस्यापि वाहिकाः - मुख्यमन्त्री रेखा गुप्ता

## सुभाषितम्

**उग्रत्वं च मृदुत्वं च,**
**समग्रं वीक्ष्य संश्रयेत्।**
**अन्धकारमसंहृत्य,**
**नोग्रो भवति भास्करः।।**

भावार्थः- वर्तमान परिस्थिति का पूर्ण आकलन करने के पश्चात् ही परिस्थिति के अनुसार कठोर या मृदु व्यवहार करना चाहिए, देखो न! सूर्य भी अन्धकार के आगमन पर अपने उग्र रूप में नहीं रहता है।

## नेपालदेशे प्रधानमन्त्री-पदस्य प्रत्याशी श्रीबालेंद्रशाहः झापा-निर्वाचनक्षेत्र-संख्या ५ तः प्रतिनिधिसभायाः सदस्यत्वेन निर्वाचितः

नेपालदेशे राष्ट्रिय-स्वतन्त्र-पार्टी-पक्षस्य प्रधानमन्त्री-पदस्य प्रत्याशी श्रीबालेंद्रशाहः झापा-निर्वाचनक्षेत्र-संख्या ५ तः प्रतिनिधिसभायाः सदस्यत्वेन निर्वाचितः अस्ति। श्रीबालेंद्रशाहः पूर्वप्रधानमन्त्रिणं तथा सी.पी.एन. (यू.एम.एल.) इत्यस्य अध्यक्षं श्री के.पी. शर्मा ओलीमहोदयं विशालमतानाम् अन्तरेण पराजित्य निर्वाचनं जितवान्। श्रीबालेंद्रशाहाय ६८,३४८ मतानि प्राप्तानि, यदा तु श्रीओलीमहोदयाय १८,७३४ मतानि एव मिलितानि। आहत्य १,६३,३७९ मतदातृषु १,०६,५६८ मतदातारः मार्च-मासस्य ५ दिनाङ्के निर्वाचने स्वस्य मताधिकारस्य प्रयोगं कृतवन्तः।

## प्रधानमन्त्री नवदेहल्यां प्रायः सार्द्ध-त्रयः त्रिंशतसहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानाम् उद्घाटनम्, शिलान्यासं च करिष्यति

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्यां प्रायः सार्द्ध-त्रयः त्रिंशतसहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानाम् उद्घाटनम्, शिलान्यासं च करिष्यति। श्रीमोदी प्रायः त्रिशताधिक-अष्टादश-सहस्र-कोटिरूप्यकाणां दिल्ली-मेट्रो-परियोजनानाम् उद्घाटनम्, शिलान्यासं च विधास्यति। सः देहली-मेट्रो इत्यस्य द्वयोः नूतनयोः मार्गयोः उद्घाटनं करिष्यति। प्रधानमन्त्री श्रीमोदी दिल्ली-मेट्रो इत्यस्य फेज-फाईव-ए इत्यस्य अन्तर्गतस्य षोडश किलोमीटर-परिमितस्य मार्गस्य त्रयाणां नूतनानां मार्गाणां शिलान्यासम् अपि करिष्यति। सामान्य-पूल-आवासीय-आवासस्य (जी. पी. आर्. ए.) पुनर्विकास-योजनायाः अन्तर्गतस्य द्विशताधिक-पञ्चदश-सहस्र कोटि-रूप्यकाणां बहुविध परियोजनानां उद्घाटनम् शिलान्यासं चापि सः करिष्यति।

## तैल मूल्येषु वृद्धिः

तैल-विपणन-संस्थाः देशस्य महानगरेषु विना अनुदानितस्य गृह एल्. पी. जी. वातीन्धनेत्यस्य मूल्यं षष्टी रूप्यकाणि, वाणिज्यिक सिलिण्डर इत्यस्य मूल्यं पञ्चदशोत्तरैकशत रूप्यकाणि यावत् च वर्धितवन्तः।

## अन्ताराष्ट्रिय-महिला-दिवसस्य पूर्वसन्ध्यायां राष्ट्रपतिः द्रौपदी मुर्मुः वर्या देशस्य सर्वेभ्यः नागरिकेभ्यः, विशेषतः महिलानां कृते शुभाशयाः च प्रेषितवती



हिमसंस्कृतवार्ताः - अन्ताराष्ट्रिय-महिला-दिवसस्य पूर्वसन्ध्यायां राष्ट्रपतिः द्रौपदी मुर्मुः वर्या देशस्य सर्वेभ्यः नागरिकेभ्यः, विशेषतः महिलानां कृते शुभाशयाः च प्रेषितवती। स्वस्य सन्देशे राष्ट्रपतिः अवदत् यत् महिलाः समाजस्य राष्ट्रस्य च आधारस्तम्भाः सन्ति तथा च शिक्षिताः, स्वावलम्बिनः, सशक्ताः च महिलाः समृद्धस्य प्रगतिशीलस्य च राष्ट्रस्य कृते दृढतया योगदानं कर्तुं शक्नुवन्ति। अद्य युवत्यः नूतन-भारतस्य स्वप्नानि निर्मीयन्ते इति राष्ट्रपतिः अवधानं दत्तवती।

## लोकसभाध्यक्षः ओम् बिरला राजस्थानस्य मुख्यमन्त्री भजन लाल शर्मा, नागरिक विमानन-मन्त्री राम मोहन नायडु च कोटा-बुन्दी ग्रीन्फील्ड विमानस्थानकस्य शिलान्यासं कृतवन्तः



हिमसंस्कृतवार्ताः - लोकसभाध्यक्षः ओम बिरला राजस्थनस्य मुख्यमन्त्री भजन लाल शर्मा, नागरिक विमानन-मन्त्री राम मोहन नायडु च कोटा-बुन्दी ग्रीन्फील्ड् विमानस्थानकस्य शिलान्यासं कृतवन्तः । शिलान्यास-समारोहस्य अवसरे आभासीय-मध्यमेन प्रदत्ते सन्देशे प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् वायु-सम्पर्केण सम्बद्धानि क्षेत्राणि द्रुततरं विस्तृतं विकसितं च अनुभवन्ति । नूतनस्य कोटा-बुण्डी-ग्रीन्फील्ड्-विमानस्थानकस्य शिलान्यास-समारोहस्य अवसरे आभासीय-मध्यमेन प्रदत्ते सन्देशे प्रधानमन्त्री उक्तवान् यत् चतुर्दशोत्तर द्विसहस्र तमवर्षात् प्राक् भारते प्रायः सप्तति विमानस्थानकानि एव आसन्, परश्च अधुना विमानस्थानकानां सङ्ख्या षष्ठ्योत्तरैकशततः अधिका जाता। सः अवोचत् यत् इदानीं देहली-नगरं परितः अनेकानि विमानस्थानकानि विकसितानि सन्ति। श्रीमोदी अवदत् यत् यदा विमानस्थानकानि निर्मीयन्ते तदा ते समीपस्थेषु लघुनगरेषु उद्यमशीलताम् पर्यटनं च प्रोत्साहयन्ति, तथा च अस्मिन् प्रदेशे आर्थिकक्रियाकलापान् च त्वरितं कुर्वन्ति। सः अवदत् यत् कोटा-विमानस्थानकं कोटा-नगरं परितः स्थितानां क्षेत्राणां कृते प्रगतेः नूतनं द्वारं उद्घाटयिष्यति। लोकसभायाः अध्यक्षः ओम बिरला वर्यः अपि कार्यक्रमम् अभिसंबोधितवान्।

## राष्ट्रपतिः पश्चिमबङ्गस्य दार्जिलिङ्ग-नगरे अन्ताराष्ट्रिय-संथाल परिषदा आयोजिते नवमम् अन्ताराष्ट्रिय-संथाल-सम्मेलनं अभिसंबोधितवती



हिमसंस्कृतवार्ताः - राष्ट्रपतिः द्रौपदीमुर्मुः अवदत् यत् केन्द्र-सर्वकारेण जनजातीय समुदायानां, तेषां सांस्कृतिकपरम्पराणां, भाषाणां च सर्वांगीणविकासाय अनेकानि उपायानि स्वीकृतानि । राष्ट्रपतिः पश्चिमबङ्गस्य दार्जिलिङ्ग-नगरे अन्ताराष्ट्रिय-संथाल परिषदा आयोजिते नवमम् अन्ताराष्ट्रिय-संथाल-सम्मेलनं अभिसंबोधितवती। अस्मिन् अवसरे सम्बोधयन्ती राष्ट्रपतिः अवदत् यत्, समृद्धा संथाली-संस्कृतिः परम्पराः च प्रकृत्या, पर्यावरण संरक्षणेन, मानवेन सह तस्य सह-अस्तित्वेन च गभीरतया सम्बद्धानि सन्ति। सा अवोचत् यत् संथाल समुदायस्य ओल्-चिकी-लिपि संविधानस्य अष्टम अनुसूच्यां समाविष्टा आसीत् इति। सा अवोचत् यत् त्रयोविंशत्यधिक द्विसहस्रतम वर्षादरभ्य विभिन्नेषु राज्येषु बहवः आदिवासि-सङ्ग्रहालयाः स्थापिताः सन्ति यानि आदिवासिनां संस्कृतिं, परम्पराः, इतिहासं च वैभवी कुर्वन्ति ।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## केन्द्रीय-गृह-मन्त्री अमितशाहः उत्तराखण्ड-राज्यस्य हरिद्वार-नगरे प्रायः त्रिंशोत्तरैकशतकोटिरूप्यकाणां विविधविकासपरियोजनानां उद्घाटनम् शिलान्यासं कृतवान्

हिमसंस्कृतवार्ताः - केन्द्रीय-गृह-मन्त्री अमितशाहः उत्तराखण्ड-राज्यस्य हरिद्वार-नगरे प्रायः त्रिंशोत्तरैकशतकोटिरूप्यकाणां विविधविकासपरियोजनानां उद्घाटनम् तथा शिलान्यासं कृतवान्। अस्मिन् अवसरे जन-जन की सरकार, चार साल बेमिसाल इत्यनेन शीर्षकेन कार्यक्रमः आयोजितः आसीत्। उत्तराखण्ड-सर्वकारस्य चतुर्वर्षाणां स्मरणे अस्मिन् कार्यक्रमे राज्य-स्तरीय-प्रदर्शिन्यः स्थापिताः आसन्, यत्र सर्वकारस्य प्रमुखोपलब्धयः, प्रमुख-नीति-निर्णयाः च प्रदर्शयन्ते।

# हिमाचलप्रदेशस्य मन्त्रिमण्डलनिर्णयाः- पंचायतनिर्वाचनेषु पुनः आरक्षिताः न भविष्यन्ति पंचायताः, अंशकालिकाः जलवाहकाः भविष्यन्ति नियमिताः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-मन्त्रिमण्डलस्य सभा शनिवासरे मुख्यमंत्रिणः सुखविंदरसिंह सुक्खुवर्यस्य अध्यक्षतायां सम्पन्ना। अस्यां सभायां बहवः महत्त्वपूर्णाः निर्णयाः स्वीकृताः। मन्त्रिमण्डलेन हिमाचलप्रदेश-पंचायतीराज-चुनावनियम 1994 इत्यस्य नियमेषु 28, 87, 88, 89 च प्रस्तावितसंशोधनानां विषये सामान्यजनात् आपत्तयः परामर्शाश्च आमन्त्रयितुं निर्णयः कृतः।
प्रस्तावितसंशोधनानुसारं वर्षं 2010 आधारवर्षरूपेण स्वीक्रियते। ये ग्रामपञ्चायताः निरन्तरं द्वौ कार्यकालौ आरक्षिताः आसन्, ताः आगामीषु पंचायतनिर्वाचनेषु पुनः आरक्षिताः न भविष्यन्ति। एवं पंचायतीराजनिर्वाचनेषु 2010 वर्षस्य अन्ते स्थापितं आरक्षणरोस्टरं पुनः प्रवर्तयितुं योजना अस्ति। अस्य विषये राज्यस्य राजस्वमन्त्री जगत सिंह नेगी मन्त्रिमण्डलनिर्णयानां विषये सूचना प्रदत्तवान्।

### सामाजिकसुरक्षापेन्शननियमेषु परिवर्तनम्

मन्त्रिमण्डलेन सोशल सिक्योरिटी पेंशन पेंशन रूल्स, 2010 इत्यस्मिन् अपि परिवर्तनं स्वीकृतम्। अस्मिन् ‘बेसहारा’ इति शब्दस्य अधिकस्पष्टव्याख्या कृताऽस्ति तथा पेन्शनलाभप्राप्तये प्रमाणनप्रक्रिया सरलता प्राप्तवती। नवीननियमेषु ये स्त्रियः पतिभिः त्यक्ताः, येन सह न वसन्ति, तथा येषां पृथक् आजीविकास्रोतः नास्ति, ताः ‘बेसहारा महिला’ इति मन्यन्ते।

### स्वर्णजयन्ती ऊर्जानीतौ ‘चिल्ड्रेन ऑफ द स्टेट’ कृते लाभः

मन्त्रिमण्डलेन स्वर्णजयन्ती ऊर्जानीत्याः अन्तर्गतं स्थानीयक्षेत्रविकासनिधेः 40 प्रतिशतं भागं “चिल्ड्रेन ऑफ़ द स्टेट” इत्येतेभ्यः वित्तीयसहायतारूपेण दातुं निर्णयः कृतः। अपि च एकमुष्टमाफीयोजनायाः लाभं प्राप्तवन्त्यपि समये आरम्भं न कृतवन्त्यः 15 जलविद्युतपरियोजनाः निरस्ताः कर्तुं स्वीकृतिः प्रदत्ता।

### 10 मेगावाट लघुजलविद्युतपरियोजना बीबीएमबी संस्थायै

मन्त्रिमण्डलेन पण्डोहप्रदेशे 10 मेगावाट क्षमतायुक्तां लघुजलविद्युतपरियोजनां भाकरा व्यास मैनेजमेंट बोर्ड (बीबीएमबी) संस्थायै आबंटयितुं निर्णयः कृतः, अस्य शर्तः यत् उपयुज्यमाना न भवति या भूमिः सा राज्यसरकाराय प्रत्यावर्तिता भविष्यति। अस्याः परियोजनायाः माध्यमेन राज्यसरकाराय 13 प्रतिशतं निःशुल्कविद्युत् तथा 5 प्रतिशतं विद्युत् भागरूपेण प्राप्तं भविष्यति।
एकग्रामयोजनायाः, बहुग्रामयोजनायाः अन्तर्गतं ग्रामेषु निर्मितस्य अधोसंरचनायाः संचालनरक्षणयोः उत्तरदायित्वं ग्रामपञ्चायताभ्यः दातुम्अपि स्वीकृतिः प्रदत्ता।

### ढगवारप्रदेशे दुग्धउत्पादकसहकारीसंघः

मन्त्रिमण्डलेन धगवारप्रदेशे क्षेत्रीयः सहकारीदुग्धउत्पादकसंघः स्थापयितुं स्वीकृतिः प्रदत्ता। अस्मिन् काँगड़ा, हमीरपुर, चम्बा, ऊना जिलानां च दुग्ध- उत्पादकाः सम्मिलिताः भविष्यन्ति। धगवार दुग्धप्रक्रियाप्रकल्पस्य प्रबन्धनाय संचालनाय च राष्ट्रीय डेयरी डेवलपमेंट बोर्ड संस्थां प्रशासकरूपेण नियुक्तं निर्णयः कृतः।


### चण्डीगढ-शिमला हेलिटैक्सी सेवा

मन्त्रिमण्डलेन चंडीगढ़– शिमला मार्गे हेलीटैक्सीसेवायाः उड्डयनसंख्या सप्ताहे त्रयात् द्वादशपर्यन्तं वर्धयितुं स्वीकृतिः प्रदत्ता। सप्ताहे षट् दिनानि प्रतिदिनं द्वे उड्डयने भविष्यतः। राज्यसरकारः संचालनसहायार्थं ‘वायबिलिटी गैप फंडिंग’ प्रदास्यति।
**पदपूर्तेः स्वीकृतिः**-मन्त्रिमण्डलेन ‘जल जीवन मिशन’ योजनायाः अन्तर्गतं नियुक्तानाम् आउटसोर्सकर्मचारिणां वेतनं राज्यसंसाधनैः दातुं निर्णयः कृतः, यतः केन्द्रसरकारेण निधिः अद्यापि न प्रदत्तः। तकनीकीशिक्षाविभागस्य अधीनस्थेषु अभियान्त्रिकी तथा फार्मेसी महाविद्यालयेषु 60 कनिष्ठसहायकप्राध्यापकपदानि पूरयितुं स्वीकृतिः प्रदत्ता। सहकारिताविभागे सहायकपंजीयकस्य 2 पदानि तथा निरीक्षकसहकारितासमितीनां 30 पदानि पूरयितुं स्वीकृतम्। शिक्षाविभागस्य क्रीडाछात्रावासेषु 16 प्रशिक्षकपदानि, सूचना- जनसम्पर्कविभागे 3 कनिष्ठकार्यालयसहायक (आईटी) पदानि पूरयितुं निर्णयः कृतः।
**अन्ये निर्णयाः**-हमीरपुरस्य खरीडीस्थित क्रीडाछात्रावासस्य क्षमता 100 शय्यापर्यन्तं वर्धयित्वा राज्यस्तरीय- क्रीडा- उत्कृष्टताकेन्द्ररूपेण विकासः स्वीकृतः। गगरेटक्षेत्रे उपमण्डलीय-पुलिसकार्यालयस्थापनं, कोटखाई प्रदेशे नवीनकेन्द्रीयविद्यालयस्य उद्घाटनार्थं भूमेः शिक्षा मन्त्रालयाय हस्तान्तरणं, कोटला पुलिसपोस्टस्य पुलिसथानरूपेण स्तरोन्नतिः इत्यादयः निर्णयाः अपि स्वीकृताः।

### हिमुडा लीज नियमेषु परिवर्तनम्-

मन्त्रिमण्डलेन हिमाचलप्रदेश हाउसिंग एंड नगर विकास प्राधिकरणस्य कृते 80 वर्षपर्यन्तं भूमेः लीज- प्रदानाय स्वीकृतिः प्रदत्ता। एतदर्थं हिमाचलप्रदेश लीज नियम 2013 इत्यस्य नियम 7 मध्ये संशोधनं करिष्यते। पूर्वं राज्यसरकारः 40 वर्षात् अधिककालाय भूमिं लीज इत्यस्मिन् दातुं न शक्नोति स्म।
अन्ते मन्त्रिमण्डलेन सिरमौर मण्डले शिक्षाविभागे कार्यरतानां तेषाम् अंशकालिकजलवाहकानां सेवाः नियमिताः कर्तुं निर्णयः कृतः, ये 31 मार्च 2025 पर्यन्तं 11 वर्षाणि सेवां पूर्णवन्तः (सप्तवर्षाणि अंशकालिकजलवाहकरूपेण, चत्वारि वर्षाणि च दैनिकभोगिरूपेण)।

# पश्चिम-एशियायाः स्थितिकारणात् सीबीएसई-परीक्षाः स्थगिताः




पश्चिम-एशियायाः वर्तमान-परिस्थितीः दृष्ट्वा, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड (सीबीएसई) इत्यनेन अस्मिन् क्षेत्रे मार्च-मासस्य ९, १०, ११ दिनाङ्केषु आयोज्यमानाः द्वादश-कक्ष्यायाः परीक्षाः स्थगिताः। बोर्ड-प्रशासनेन उक्तं यत् परीक्षाणां नूतनाः तिथयः पश्चात् घोषयिष्यन्ते। सीबीएसई इत्यनेन ज्ञापितं यत् एतस्मिन् विषये मार्च-मासस्य १० दिनाङ्के स्थितेः समीक्षां करिष्यति तथा च १२ मार्च-दिनाङ्कतः आरभ्यमाणानां परीक्षाणां सम्बन्धे उचितं निर्णयं स्वीकरिष्यति। बोर्ड-प्रशासनेन छात्राः परामृष्टाः यत् ते नूतन-सूचनायै स्व-विद्यालयानां सम्पर्कं कुर्वन्तु तथा च आधिकारिक-घोषणानाम् अनुसरणं कुर्वन्तु।

# अधुना मनरेगा-अन्तर्गते ५० दिनानि कार्यं कुर्वन्तः परिवाराः बी. पी. एल. (BPL) सूच्यां सम्मिलिताः भविष्यन्ति

हिमसंस्कृतवार्ताः- शिमला। ग्रामीणविकासविभागस्य प्रवक्तुः अनुसारं, विभागेन बी. पी. एल. परिवाराणां निर्धारणे सम्बद्धेषु मार्गदर्शिकासु संशोधनं कृतम् अस्ति। सः अवदत् यत् विभागद्वारा निर्गतान् निर्देशान् समये-समये कृतान् संशोधनान् च अनुसरन्, ४ फरवरी, २०२६ दिनाङ्कस्य बी. पी. एल. मार्गदर्शिकायाः अनुच्छेदः १ (क) (४) पुनः संशोधितः। संशोधित-प्रावधानानुसारम् अधुना तादृशाः परिवाराः अपि बी. पी. एल. सूच्यां स्थानं प्राप्तुं शक्ष्यन्ति, येषां सर्वे वयस्काः सदस्याः पूर्वस्मिन् वित्तवर्षे मनरेगा- योजनायाः अन्तर्गतं न्यूनतमेन ५० दिनानि कार्यं कृतवन्तः। प्रवक्तुः अनुसारं, प्रथमचरणात् चतुर्थचरणपर्यन्तं सर्वेक्षणकाले प्राप्तेषु आवेदनेषु अपि एतस्याः श्रेण्याः अन्तर्गतं विचारः करिष्यते। एतदतिरिच्य, पात्रपरिवारेभ्यः नूतनानि आवेदनानि १२ मार्च, २०२६ पर्यन्तं स्वीकरिष्यन्ते। प्रवक्ता सूचितवान् यत् प्रक्रियापूर्त्यनन्तरं निर्गताधिसूचनानुसारं, १५ मार्च, २०२६ दिनाङ्कपर्यन्तं खण्डस्तरीयसमित्या तादृशाः पात्रपरिवाराः पञ्चायतवार अधिसूचिताः भविष्यन्ति। एषा सूची “बी. पी. एल. परिवाराणां पञ्चमचरणस्य सूची” इति रूपेण प्रकाशिता भविष्यति। सः स्पष्टीकृतवान् यत् प्रथमचरणात् चतुर्थचरणपर्यन्तं कृताः सर्वाः कार्यविधयः, सज्जीकृताः सूच्यः तथा स्वीकृताः निर्णयाः च यथावत् स्थास्यन्ति, तेषु किमपि परिवर्तनं न भविष्यति। पञ्चमचरणस्य सर्वेक्षणार्थं संशोधन-मानदण्डान् विहाय अन्याः सर्वाः प्रक्रियाः (यथा- सत्यापनम्, अनुमोदनम्, अपीलम्, अभिलेख-रक्षणं च) विभागस्य १९ मार्च, २०२५ तथा १५ दिसम्बर, २०२५ दिनाङ्कयोः अधिसूचनासु वर्णितानुसारमेव भविष्यन्ति।

# एनसीवीईटी- 'ड्यूल स्टेटस' (द्वैध-स्थिति) प्राप्तकर्ता देशस्य द्वितीयं राज्यमभवत् हिमाचलम्- शिक्षामन्त्री



**हिमसंस्कृतवार्ताः - शिमला।**
शिक्षामन्त्री रोहितठाकुरः अघोषयत् यत् वर्तमान-राज्यसर्वकारस्य तथा हिमाचलप्रदेश- विद्यालय-शिक्षा- मण्डलम् (HPBOSE) इत्यस्य निरन्तरप्रयासानां फलस्वरूपं बोर्ड-संस्थायै राष्ट्रिय-व्यावसायिक- शिक्षा- प्रशिक्षणपरिषदः (NCVET) पक्षतः "ड्यूल कैटेगरी" अर्थात् द्वैध- श्रेणी इति मान्यता प्राप्ता। अनया उपलब्ध्या सह हिमाचलप्रदेशः, आन्ध्रप्रदेशात् परं देशस्य द्वितीयं तादृशं राज्यम् अभवत्, यस्मै 'अवार्डिंग बॉडी' (AB) 'असेसमेंट एजेन्सी' (AA) इति उभयरूपेण मान्यता प्रदत्ता अस्ति। सः अवदत् यत् एषा उपलब्धिः राज्ये व्यावसायिकशिक्षायाः सुदृढीकरणाय युवभ्यः च जीविका-अवसराणां वर्धनाय एकं महत्त्वपूर्णं पदम् अस्ति। अनया मान्यतया सह अधुना हिमाचलप्रदेश-विद्यालय- शिक्षामण्डलं राष्ट्रिय- कौशल- योग्यता-संरचनानुसारं (NSQF) व्यावसायिक- पाठ्यक्रमाणां निर्माणं, प्रशिक्षणं, मूल्याङ्कनं प्रमाणनं च स्वयमेव कर्तुं शक्ष्यति।

### अकादमिक-व्यावसायिक-शिक्षायाः समन्वयः

शिक्षामन्त्री अकथत् यत् अस्यां व्यवस्थायां निर्गतानां प्रमाणपत्राणां राष्ट्रियस्तरे मान्यता भविष्यति, येन छात्राः देशे विदेशे च उच्चशिक्षायाः जीविकायाः च श्रेष्ठान् अवसरान् प्राप्स्यन्ति। एषः आरम्भः राष्ट्रिय-शिक्षा-नीति (NEP) 2020 इत्यस्य तस्य दृष्टिकोणस्य अनुरूपं अस्ति, यत्र अकादमिक-व्यावसायिक-शिक्षयोः भेदं दूरीकर्तुं बलं दत्तम् अस्ति। रोहित ठाकुरः अवदत् यत् अस्याः नूतनव्यवस्थायाः अन्तर्गतं प्रथमं मुख्यं पदं स्थापयित्वा राज्यसर्वकारेण विद्यालयेषु 'उद्यानकृषि' (Horticulture) विषये व्यावसायिक-पाठ्यक्रमः आरभ्यते। सः उक्तवान् यत् हिमाचलप्रदेशः 'भारतस्य फलपात्रम्' (Fruit Bowl of India) इति नाम्ना विख्यातः अस्ति, एषः पाठ्यक्रमः राज्यस्य कृषि-उद्यान-आधारित-अर्थव्यवस्थां सुदृढां कर्तुं सहायकः भविष्यति।

### उद्यानकृषि-प्रबन्धनं व्यावहारिक-प्रशिक्षणं च

अस्य पाठ्यक्रमस्य माध्यमेन छात्रेभ्यः उद्यान-प्रबन्धनं, शस्योत्तरं) पोस्ट-हार्वेस्ट) तान्त्रिकता, जैविककृषिः च इत्यादिषु विषयेषु वैज्ञानिकसूचनाः व्यावहारिकं प्रशिक्षणं च प्रदास्यते। अनेन राज्यस्य सेव-उत्पादन-सम्बद्धेभ्यः उद्योगेभ्यः कुशलं युवा-कार्यबलम् उपलब्धं भविष्यति तथा युवसु स्वजीविकायाः भावना जागृता भविष्यति।

### आधुनिक-कौशल-प्रयोगशालानां स्थापना

शिक्षा-मण्डलस्य सचिवः मेजर विशालः अवदत् यत् एषः कार्यक्रमः NSQF इत्यस्य १ तः ४ स्तरपर्यन्तं चालयिष्यते, येन एतत् सुनिश्चितं भविष्यति यत् विद्यालयेषु शिक्षितानि कौशलानि आधुनिक-उद्योगाणां कृते उपयोगिनि स्युः। सः सूचितवान् यत् एतेषां पाठ्यक्रमाणां प्रभावी- कार्यान्वयनाय बोर्डद्वारा 'मानक- सञ्चालन- प्रक्रियाः' (SOPs) सज्जीक्रियन्ते। सहैव सर्वकारीय- विद्यालयेषु आधुनिक- कौशल-प्रयोगशालाः (Skill Labs) स्थापयितुं योजना अस्ति येन छात्राः प्रयोगात्मकं प्रशिक्षणं प्राप्तुं शक्नुयुः। मेजर विशालः अवदत् यत् मण्डलं एतां नूतनव्यवस्थां पारदर्शिरूपेण प्रवर्तयितुं पूर्णतः प्रतिबद्धः अस्ति।

# क्यार्टूराजकीयसंस्कृतमहाविद्यालये 'सडक–सुरक्षा–क्लब' इत्यस्य अन्तर्गतमायोजितं विशेषव्याख्यानम्




**हिमसंस्कृतवार्ता- डॉ.सन्तोषकुमारः**
क्यार्टू–राजकीय–संस्कृत–महाविद्यालये 'सडक–सुरक्षा–क्लब' इत्यस्य अन्तर्गतमेकं विशिष्टं व्याख्यानं विधिवत् आयोजितम्। अस्मिन् व्याख्याने मुख्यातिथिरूपेण मुख्यवक्तृरूपेण च 'पुलिस थाना ठियोग' इत्यस्य वरिष्ठाधिकारी श्रीराकेशकुमारधीमानमहोदयः उपस्थितः आसीत् । कार्यक्रमस्य अध्यक्षता महाविद्यालयस्य प्राचार्येण डॉ.राकेशकुमारशर्ममहोदयेन कृता। अस्मिन् व्याख्यानात्मक–कार्यक्रमे भाषण प्रतियोगिता–ऽनन्तरं मुख्यवक्त्रा श्रीराकेशकुमारधीमान–महोदयेन छात्राः 'सडक सुरक्षा तथा बचाव' इति विषयमधिकृत्य विस्तृतं व्याख्यानं प्रस्तुतम् । अपि च 'सडक–सुरक्षा–क्लब' इत्यस्य तत्त्वावधाने आयोजितासु विविधप्रतियोगितासु प्रथम–द्वितीय–तृतीयस्थानानि प्राप्तवतां प्रतिभागिनां कृते पुरस्काराः वितरिताः।
कार्यक्रमस्य आरम्भः दीपप्रज्वलनेन सरस्वतीवन्दनया च जातः । 'सडक–सुरक्षा–क्लब' इत्यस्य प्रभारी डॉ.सुनीलदत्तमहोदयः आगतानाम् अतिथीनां सादरं स्वागतं कृतवान् अपि च सम्पूर्णसत्रे सम्पन्नानां कार्यक्रमाणां गतिविधीनां च समीक्षामपि कृतवान्। कार्यक्रमे अतिथिरूपेण आरक्षकौ अमितमहोदयः, सुरेशमहोदयश्चापि समुपस्थितौ । समारोहेऽस्मिन् रीतिका, अक्षयः, विक्रान्तः, अदितिः, पीयूषः, वन्दना, निवेदिता, वंशिका चेत्यादयः छात्राः पुरस्कारा् प्राप्तवन्तः अपि च डॉ.इति शर्मा, डॉ.दिनेशः, डॉ.भावना, सुश्रीः ममता, डॉ.सन्तोषः, श्रीदिवाकरदत्तः, श्रीमती मीना, श्रीमती मीरा चेत्यादयः आचार्याः कर्मचारिणः छात्राश्च उपस्थिताः आसन्।

**असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः**

# संस्कृतं मधुरं सदा -०४

हिन्दुसनातनिनः सर्वे जानीयुः, मन्वीरन् च यत् "गावः मातरः" इति । वेदेऽपि उल्लिखितमस्ति यत् "गावो विश्वस्य मातरः" इति । अर्थात् गौः विश्वस्य माता कथ्यते । वसुधा अपि गोरूपा माता वर्तते । गौः सर्वेषां पशूनां प्रतिनिधिरूपा अस्ति । आर्थिकं, सामाजिकं, धार्मिकम् इत्यादिदृष्ट्या प्राचीनकालतो हि भारतीयसमाजस्य कृते गोवंशतः बहुर्लाभः सञ्जातोऽस्ति । गौः सदैव निरीहा, सरला, तृणजीविनी, पूर्णतः अहिंसका, पशुरूपा जननी अस्ति । वैज्ञानिकदृष्ट्या अपि अस्याः दुग्धघृतादिकम् औषधरूपं, बलबुद्धिवर्धकं च वर्तते । अस्माकं देशः कृषिप्रधानः। कृषिक्षेत्रविषये सर्वतोभावेन गवां सहयोगः अनतिसाधारणः। प्रायः सप्ततिप्रतिशतं भारतीयजनाः ग्रामेषु निवसन्ति । तेषु प्रायशः जनाः गोपालनं कुर्वन्तः आत्मनिर्भरशीलाः अवलोक्यन्ते । अतः मातृसेवावत् गोपालनं सर्वेषां भारतवासिनां कृते मुख्यं कर्तव्यम् अस्ति । इतरधर्मावलम्बिभिरपि गोपालनरक्षणादिकार्यं करणीयम् । परन्तु विडम्बना यत् स्वतन्त्रभारते अपि सम्प्रति गावः अत्यन्तं सङ्कटे, दुःखगर्ते च निपतिताः सन्ति । कैश्चन विधर्मिभिः गावः हन्यन्ते, खाद्यन्ते च, यच्च महापापम् । भारतसर्वकारेण, समस्तहिन्दुभिश्च गोहत्यायाः निषेधार्थम् आप्राणं चेष्टा करणीया । स्वकीयाः पूज्याः गावः प्रतिदिनं निर्दयं हन्यमानाः सन्ति, इत्येतत् कथं द्रष्टुं शक्यते, सह्यते च अस्माभिः। तस्मात् सर्वैरस्माभिः एकीभूय गवां रक्षा करणीया । अन्यथा सृष्टिकालतः आगता गोपूजनपरम्परा, धर्मसंस्कृतिः च अवश्यं विनङ्क्ष्यति । तथा अस्मन्मातॄणां गवां भृशम् अभिशापात् वयं सर्वे नष्टाः, भ्रष्टाः च भवेम, नात्र शङ्का इत्यस्तु ।

# जन औषधि परियोजना: विकसितभारतस्य आधारशिला स्ववृत्यावसराणां च साधनम्

केन्द्रीय-रसायन-उर्वरक-मन्त्री श्री जगत प्रकाश नड्डा महोदयः उक्तवान् यत् 'प्रधानमन्त्री भारतीय जन औषधि परियोजना' जन-औषधि-केन्द्राणां माध्यमेन स्ववृत्यावसरान् प्रदाय २०४७ पर्यन्तं 'विकसित-भारतस्य' परिकल्पनायां महत्त्वपूर्णं योगदानं ददाति। नूतनदेहली नगरे अष्टमस्य जन औषधि दिवसस्य अवसरे श्री नड्डा महोदयः एतं कार्यक्रमं सुदृढं कर्तुं बलं दत्तवान्। तेन उक्तं यत् उच्चगुणवत्तायुक्तानां 'जेनेरिक' औषधीनां सुनिश्चयः, जनेषु जागरूकतायाः वर्धनम्, सर्वेषु केन्द्रेषु औषधीनां निरन्तर-उपलब्धतायै आपूर्ति-शृङ्खलायाः (Supply Chain) परिष्कारः, तथा च संचालकानां कृते स्थिर-लाभस्य (Sustainable Profit) प्रत्याभूतिः प्रदाय एषा परियोजना सुदृढा कर्तुं शक्यते। अनेन देशव्यापीनां उद्यमिनां कृते एषा पहलः सफला भविष्यति। श्री नड्डा महोदयः सूचितवान् यत् अष्टसहस्राधिकानि (८०००+) जन-औषधि-केन्द्राणि महिलाभिः सञ्चाल्यन्ते। एतत् दर्शयति यत् एषा योजना महिलाः सफलाः उद्यमिन्यः निर्मातुं कथं सक्षमाः कृतवती अस्ति। केन्द्रीय-रसायन-उर्वरक-राज्यमन्त्री श्रीमती अनुप्रिया पटेल महोदया अपि देशे महिला-उद्यमिनां सक्षमीकरणे अस्याः परियोजनायाः प्रमुखां भूमिकां अधोरेखाङ्कितवती। तया उक्तं यत् जन-औषधि-परियोजना न केवलं सुलभमूल्ये औषधानि प्राप्तुं साहाय्यं करोति, अपितु महिलानां कृते जीविकायाः महत्त्वपूर्णाः अवसराः अपि सृजति।

# महिलाः केवलं परम्परायाः न, अपितु परिवर्तनस्यापि वाहिकाः - मुख्यमन्त्री रेखा गुप्ता




- **निर्णयक्षमतायाः, साहसस्य, परिश्रमस्य च कोऽपि 'लिङ्गभेदः' न भवति – रेखा गुप्ता**
- **मङ्गलाचरणात् आरभ्य 'ऑपरेशन सिन्दूर' पर्यन्तं महिलाः सर्वक्षेत्रेषु उत्कृष्टं कार्यं कृतवत्यः - शान्ताकुमारी**
- **नवदेहली: 'भारती-नारीतः नारायणी' परिषदः भव्यमुद्घाटनम्**

**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नवदेहली।**

भारतस्य महिलाः केवलं परम्परायाः वाहिकाः न सन्ति, अपितु ताः परिवर्तनस्य वाहिकाः अपि सन्ति। देहल्याः मुख्यमन्त्री रेखा गुप्ता विज्ञानभवने आयोजिते महिलाचिन्तकानां द्विवसीय-राष्ट्रिय-सम्मेलनस्य 'भारती-नारीतः नारायणी' इत्यस्य उद्घाटनसमारोहे एतद् प्रतिपादितवती। मार्च-मासस्य अष्टमदिनाङ्कपर्यन्तं प्रचलतः अस्य सम्मेलनस्य समापनं राष्ट्रपतिः द्रौपदी मुर्मु करिष्यति। अस्य आयोजनं भारतीयविद्वत्परिषद्, राष्ट्रसेविका समितिः, 'शरण्या' इति स्वयंसेवी संस्था च मिलित्वा अकुर्वन्। मुख्यमन्त्री रेखा गुप्ता अवदत् यत् निर्णयक्षमतायाः, साहसस्य, पुरुषार्थस्य च कोऽपि लिङ्गभेदः न भवति। अद्य सर्वेषु क्षेत्रेषु भारतीयमहिलाः पुरुषेभ्यः अपि श्रेष्ठं कार्यं कुर्वन्ति। महिलाः स्वयमेव स्वलक्ष्यं निर्धारितुं प्रवृत्ताः सन्ति। सा उक्तवती यत् महिलाः परिवारस्य, समाजस्य, देशस्य च अपेक्षाः अवश्यं पूरयन्तु, किन्तु स्वमनसः सुखाय अपि किञ्चित् समयं निष्कासयन्तु। सम्पूर्णपरिवारस्य स्वास्थ्यस्य ध्यानेन सह महिलाभिः स्वस्वास्थ्यस्यापि चिन्ता करणीया। सा मातृभ्यः प्रार्थनां कृतवती यत् यत् वातावरणं ताभिः न प्राप्तं, तत् ताः स्वपुत्रीभ्यः दत्त्वा तासां उड्डयनाय मुक्तम् आकाशं यच्छन्तु।

## दिल्ली-सर्वकारस्य 'लक्षपति कन्या' इति योजना

मुख्यमन्त्री रेखा गुप्ता सूचितवती यत् देहली-सर्वकारेण पुत्रीणां शक्तिवर्धनाय 'लखपति बिटिया' योजना प्रवर्तिता। पूर्वं केवलं दशमी-कक्षापर्यन्तं देहल्याः पुत्रीभ्यः आर्थिकसहायता दीयते स्म, किन्तु अधुना स्नातकपदवी-प्राप्तये प्रायः सपादलक्ष (१.२५ लक्षं) रूप्यकाणां सहायतायाः निर्णयः कृतः अस्ति। अपि च, महिलाभ्यः रात्रिकाले अपि कार्यं कर्तुं अनुमतिः दत्ता अस्ति।

## नारी समाजस्य सुदृढा शक्तिः -वी. शान्ता कुमारी

समारोहस्य अध्यक्षा राष्ट्रसेविका समित्याः मुख्यसञ्चालिका सुश्री वी. शान्ता कुमारी अवदत् यत् भारतीयसंस्कृतौ नार्याः विशिष्टं महत्त्वम् अस्ति। नारी समाजस्य धारिका सुदृढा शक्तिः अस्ति, अतः सा नारायणी भवितुं शक्नोति। सा अवदत् यत् वेदानाम् अध्ययनं भवेत् वा 'ऑपरेशन सिन्दूर' वा, भारतीयमहिलाभिः सर्वत्र अतुल्यशौर्यस्य परिचयः दत्तः।

## नारी स्वयमेव ऊर्जायाः स्रोतः प्रो. शिवानी वी.

भारतीयविद्वत्परिषदः सचिवः प्रो. शिवानी वी. अवदत् यत् 'नारीतः नारायणी' एका पवित्रा यात्रा अस्ति। महिलाः समस्याः न, अपितु अन्तिम-समाधानकर्त्र्यः ('अल्टीमेट सॉल्वर') सन्ति। सा महिलानां सम्मानार्थं प्रधानमन्त्रिणे नरेन्द्रमोदिने धन्यवादं दत्तवती। सा स्पष्टीकृतवती यत् शिक्षायाः अर्थः केवलं अक्षरविद्या न, अपितु शक्तेः संस्कारः अपि अस्ति। अस्मिन् सम्मेलने प्राप्ताः परामर्शाः भारतसर्वकारस्य सम्बद्धविभागेभ्यः प्रेषयिष्यन्ते।समारोहे अञ्जू आहूजा (अध्यक्षा, शरण्या), तेजस्विनी अनन्तकुमारः (अदम्य चेतना), विजया शर्मा, चारु कालरा च स्वविचारान् प्रकटितवन्तः। द्विवसीय-सम्मेलने अस्मिन् अष्टसु विषयेषु गम्भीरचर्चा प्रचलति, यत्र महिला-सांसदाः, कुलपतयः, साध्व्यः च भागं गृह्णन्ति। एताः सर्वाः अपेक्षिताः?

ताः तु बुद्धिमती, स्वस्य भूमिका समर्थतः धर्तुं समाजे आत्मविश्वासपूर्णं विचारितुम् नार्यः अपेक्षिताः स्वकीयम् अपत्यस्य उत्तमा पालनकर्त्री नारी। नार्यः जानन्ति स्म यद् नारी भूमौऽस्ति तथा च पुरुषौऽकाशः। आकाशं जलं पातयित्वा,निरभ्रभूत्वा,कार्यौसमाप्तम् कृत्वा अग्रे गच्छति इति।किन्तु भूमिः तज्जलं गृहीत्वा, धृत्वा,स्वस्तित्वं मिश्रयित्वा धान्यं,वर्णचित्रितम् पुष्पाणि, विविधानि फ़लानि अङ्कुरयति च।भूम्याः सृजनतायाः दायित्वम् अस्ति।सा स्थिराः भूत्वा तिष्ठति। भूमेः आविष्कारंद्रष्टुम् आकाशमेघाः पुनरागच्छति। सर्वत्र हरितासृष्टिः, वर्णचित्रितम् पुष्पाणि, सस्यानि च दृष्ट्वा अतीव आनन्दितो भूत्वा,जलं वर्षयित्वा अग्रे निर्गच्छति च।अस्यैव अस्माकं सृष्ट्यानिर्मित्याः तत्वज्ञानं खलु ? इदं तत्वज्ञानं अस्माकं आधुनिकानार्यः अवबुध्यते चेत्? मराठीभाषायाम् एकप्रसिद्धलेखकः व.पु.काळे अकथयत्—नारी कदा सुन्दरी दृश्यते? अस्यौत्तरम् अस्ति यदा सा भोजनं पचते तदा।गृहेषु सदस्यानां कृते यदा सा रुचिपूर्णं भोजनं पचति,समयोऽपरि ध्यानं दत्त्वा, सर्वेषाम् रुचेः मनसि स्थापयित्वा उत्तमानि पाकानि करोति तदा सा विश्वसुन्दरी भासते।कदा-कदा स्त्रीणाम् शरीरं घर्मयुक्तं भवति तर्हि अनवधानम् कृत्वा ताः कार्याणि कुर्वन्तैव।तदा तासां मुखोपरि असीमतृप्ती,शान्तिः च वयं द्रष्टुं शक्नुमः।प्रसाधनशालायाः सिद्धाभूत्वा आगतवती नारी सिक्थापाञ्चालिका सादृश्यंदृश्यते। सा किमपि कार्यं अकृत्वा भृत्येन द्वारा सर्वाणिकार्याणि कारयन्ति।सा नारी भोजनपाचनस्य आनन्दानुभवः न ग्रहीतुम् शक्नोति।स्वहस्ते भोजनंपक्त्वा अन्यान् परिवेषणस्य सुखं सा ज्ञातुं असमर्थाः ।

आधुनिककाले खण्डितपरिवारं अथवा विभक्तपरिवारं दृश्यते तर्हि स्त्रीपुरुषौ एकत्रितभूत्वा स्व-स्व कर्तव्यस्य पालनं करोति तदैव सत्यार्थतः महिलादिनं सार्थकं भविष्यति।नारी सातत्येन मनोरञ्जनस्य विषयभवति।किम एतत् सम्यक् अस्ति वा? महिलादिनस्य निमित्तं कृत्वा तस्योपरि विनोदं ,उपहासं च करणीयं सम्यक् वा? संस्कृतकाव्यान्तर्गत स्त्रीसौन्दर्यस्य व्यापकानि वर्णनानि सन्ति।नार्यः कायस्य एतादृशी वर्णनानि अन्यत्र नास्ति।संस्कृतसाहित्यं स्त्रीणाम् सौन्दर्यस्य वर्णनानि दृश्यते किन्तु तासां बुद्ध्यावर्णनं, शौर्यस्यवर्णनं,तासां समयसूचकता ,अवबोधनस्य शक्तिः, समज्ञतायाः वर्णानं कुत्रापि न दृश्यते।स्त्रीषु निसर्गतः एव ममत्व, प्रेम्ण,दयालुताः च अस्ति।किन्तु समाजजनाः केवलं स्त्रीणाम् सौन्दर्यऽव पश्यते ।

# अन्तर्राष्ट्रिय-महिला-दिवसः

मार्च-मासस्य अष्टमे दिनाङ्के सम्पूर्णे जगति 'अन्तर्राष्ट्रिय-महिला-दिवसः' मन्यते।

**"स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः।**
**पुरुषाणां तु पाण्डित्यं शास्त्रैरेवोपदिष्यते॥"**

अष्टमे दिनाङ्के महिलादिवसः मन्यते, किन्तु अस्य आवश्यकता किमर्थम्—किं कदापि केनापि पुरुषेण एतद् चिन्तितम्? महिलादिवसः किमर्थम्? अस्य उत्तरं अतीव सरलं वर्तते—अस्माकं पुरुषप्रधानसमाजे यदा स्त्रीणां श्वासः प्रतिरुद्धः अभवत्, तदा ताः बुद्ध्या चिन्तनं कृत्वा स्वतन्त्रतापूर्वकं निर्णयं अकुर्वन्। यदा ताः स्वस्य अधिकारान् प्रति जागरूकाः अभवन्, तदा ताभिः एषः सङ्ग्रामः आरब्धः। १९१० वर्षं यावत् स्त्रीणां समीपे मतदानस्य अधिकारः अपि नासीत्। मतदानार्थं विदेशेषु अनेकानि आन्दोलनानि अभवन्।अन्ततः स्त्रीणां परिषदि एषः विधेयकः पारितः। जन्मतः एव स्त्रीषु एतादृशाः संस्काराः आरोपिताः सन्ति यत्—"पुरुषेभ्यः किं रोचते? अस्य ध्यानम् आवश्यकम्।" सर्वाः स्त्रियः स्वकीयां रुचिं अस्तित्वं च विस्मरन्तु, श्वशुरगृहे एव सामञ्जस्यं महत्त्वपूर्णम् इति।किन्तु पुरुषाः विस्मरन्ति यत् ब्रह्मणा स्त्रीभ्यः अपि बुद्धिः दत्ता, ताः अपि स्वतन्त्रतया चिन्तनं कुर्वन्ति। ताः शिक्षिताः अपि सन्ति, पठितुं समर्थाः च, तासां समीपे सद्विवेकः अपि वर्तते। भारते नारीणां कृते 'देवी' इति विशेषणं प्रयुज्यते— 'यत्र नार्यस्तु पूजन्ते, रमन्ते तत्र देवताः'। किन्तु आधुनिका नारी 'देवी' भवितुं नेच्छति। सा तु पुरुषैः सह समानां प्रतिष्ठां इच्छति, सा उत्तमं मित्रं, उत्तमं सहचरं च वाञ्छति। सा तादृशं समाजं नेच्छति यः तस्याः चारित्र्ये अङ्गुलीं निर्दिशेत्। भारते ईश्वरचन्द्रविद्यासागरः, राजा राममोहन रायः, महात्मा ज्योतिबा फुले, सावित्रीबाई फुले, गोपाल गणेश आगरकरः, रमाबाई रानडे इत्यादयः महापुरुषाः समाजसुधारं कृतवन्तः। पुरातनकाले द्रष्टारः ऋषिकाः स्त्रियः ऋचः दृष्टवत्यः। एतत् वयं पठितवन्तः किन्तु तासां संख्या न्यूना अस्ति। समाजे केवलं एतावतः स्त्रियः एव नासन् खलु? अन्यासां स्त्रीणां का गतिः अभवत्? स्त्रीणाम् अधिकाराणां सङ्ग्रामः अधुना यशस्वी जातः, किन्तु सङ्ग्रामं कृत्वा अस्माकं पूर्वजस्त्रियः अस्मभ्यं ये अधिकाराः दत्ताः, तेषाम् अधिकाराणां दुरुपयोगं एव आधुनिकाः नार्यः कुर्वन्ति। आधुनिकाः स्त्रियः स्वकीयां मर्यादां विस्मृतवत्यः। वस्त्रात् आरभ्य विचारान् यावत् नारीणां विचारसरणी संकुचिता अभवत्। बहुभिः पुरुषैः सह विवाहोत्तर-सम्बन्धाः, गृहकलहः, गृहभङ्गः, पतिपीडनं इत्यादयः अनेकाः घटनाः वयं प्रतिदिनं पठामः पश्यामः च। किं अस्माकं पूर्वजनार्यः एतादृशकारणेभ्यः सङ्ग्रामं कृतवत्यः?

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**